दीयानि दारूणि । प्राकारः अस्मिन् स्यात् प्राकारीयोदेशः । पारिखेयी । भूमिः ॥ वत्साय हितं वत्सीयम् । शङ्कव्यम् । दारु ॥ गव्यम् । हविष्यम् । नाभये नभ्यः ॥ अक्षः । नभ्यम् ॥ अञ्जनम् । शुने शून्यम् । शुन्यम् । ऊधन्यः । आमिक्ष्यम् । आमिक्षीयम् ॥ दधि । पुरोडाश्याः । तण्डुलाः । पुरोडाशीयाः । अपूप्यम् । अपूपीयम् । शरीरावयवात् दन्त्यम् । नस्यम् । नाभ्यम् । इत्यादि । खलयवमाषतिलवृषब्रह्मणां खल्यम् । इत्यादि ॥ रथ्या । अजध्या । अविध्या ॥
ध्यन् ध्यन्

---

(1) प्राकारः आसां स्यात् प्राकारीयाः इष्टकाः stones of which the rampart walls are or may be built. प्रासादः एषां स्यात् प्रासादीयानि दारूणि Timber of which the palace is or may be built.

(2) प्राकारीयः देशः Tract or country in which the rampart walls are or may be built. पारिखेयी भूमिः Ground fit for a fort-ditch.

(3) वत्साय हितं वत्सीयं Salutary to a calf. Note:— छ, ईय come in in 1 2 & 3.

(4) शंकव्यं दारु शंकवे हितं Timber fit for pegs. गवे हितं गव्यं Salutary to cows. हविषे हितं हविष्यं fit for Homa-sacrifice. नाभये हितः नभ्यः अक्षः नभ्यं अंजनं axe on which the wheels are supported ; also greasy solution. शुने हितं शून्यं or शुन्यं Salutary or welcome to a dog. ऊधसे हितः ऊधन्यः Salutary to the udder of a cow. आमिक्षायै हित आमिक्ष्यं or आमिक्षीयं । दधि । Curd fit for the Amitsha Sacrifice. पुरोडाशेभ्यः हिताः पुरोडाश्याः पुरोडाशीयाः । तण्डुलाः । Rice fit for Purodasa— a cake used in sacrifice. अपूपाय हितं अपूप्यं or अपूपीयं fit for use in making the cake Apoopa शरीरावयवात् Regarding the base signifying the various limbs of the body. दन्तेभ्यः हितं दन्त्यं Salutary to the

यूथि: । आत्मनीनम् (ख) । विश्वजनीनम् (ख) पञ्चजनीनम् (ख) । सर्वजनीन: (ख) । सार्वजनिक: (ठञ्) । माहाजनिक: (ठञ्) । मातृभोगीण: (खञ्) । आचार्यभोगीण: (खञ्) । सर्वस्मै सार्वम् (ण) । सर्वीयम् । पुरुषेण कृत: तस्य वध: विकार: समूहो वा पौरुषेय: । माणवकाय हितं माणवकीनम् (खञ्) । अङ्गारेभ्य: एतानि अङ्गारीयाणि काष्ठानि । प्राकारीया: इष्टका: । छादिषे-

---

teeth. नासिकायै हितं नस्यं Salutary to the nose. नाभये नाभ्यं Salutary to Nabhi viz the navel. इत्यादि &c. खल्यं fit for rearing Khala ie corn. यव्यं fit for rearing Yava ie corn. माष्यं fit for rearing Masha ie corn. तिल्यं fit for rearing Thila seeds. वृष्यं Salutary or welcome to a bull. ब्रह्मण्यं Salutary or welcome to Brahmins. रथ्या fit for a car. अजथ्या (थ्यन्) Salutary to sheep. अविथ्या(थ्यन्) salutary to goats. आत्मनीनं (ख) Salutary to oneself. विश्वजनीनं(ख] Salutary to the universe. पञ्चजनीनं(ख) Salutary to five people. सर्वजनीन:(ख) or सार्वजनिक: (ठञ्) Salutary to all people. माहाजनिक: (ठञ्) Salutary to Mahajans. मातृभोगीण: (ख) Conducive to the comfort of mothers. आचार्यभोगीण: (ख) Conducive to the comforts of teacher or preceptor. सार्वम्(ण) or सर्वीयं Conducive to the welfare of all.

(5) पुरुषेण कृत: or पुरुषस्य वध: विकार: समूहो वा पौरुषेय: Respectively; made by man, his murder, change or collection of people. माणवकाय हितं माणवकीनं Conducive to the welfare of pupils.

(6) अंगारेभ्य: एतानि अंगारीयाणि fit for char-coal. प्राका-

यानि तृणानि । बलये बालेयाः तण्डुलाः । आर्षभ्यः । वत्सः ।
ढक् ढक् ञ्यः
औपानह्यः । मुञ्जः । वध्रचै इदं वाध्रम् । चर्म । इति छयतो रधि-
ञ्यः अञ्
कारः । अथ ठञधिकारः ॥

ठञोऽधिकारे क्रीताद्याः सन्त्यर्था बहवोऽत्र तु ।
क्रीताद्या अर्हतीत्यन्ता आर्हीयाः केचन स्मृताः ॥
औत्सर्गिकठञस्थाने ठगार्हीयेषु सम्मतः ।
संख्यार्थपरिमाणार्थगोपुच्छानामिहापि ठञ् ॥
प्रयोजनं स्वरादिस्याद्वैरूप्येऽपि ठक्ठञोः ।
प्रथमान्तत्वाद्यपेक्ष्य लिख्यन्तेऽर्थक्रमादिह ॥

ठकि यथा ॥ तुरङ्गेण क्रीतमित्यादि तौरङ्गिकम् । ठञि यथा ॥ सप्तत्या क्रीतं इत्यादि । साप्ततिकम् । प्रास्थिकम् । गौपुच्छिकम् ।

रीयाः fit for ramparts. आर्षभ्यः(ञ्यः) fit for bulls. छादिषेयाणि ढक्) fit for roofing. औपानह्यः(ञ्यः) fit for making shoes (leather). बालेयाः (ढक्) fit for Bali Sacrifice; rice वाध्रं(अञ्) fit for making bellows ie leather.

This closes the terminations छ and यत्.

This begins the termination ठञ्.

Rule-This termination has several meanings like क्रीत &c. The termination (ठक्) occurs in the class आर्हीय commencing from क्रीत and closing with अर्ह; ठञ् also occurs in words signifying numbers and measure. and the word गोपुच्छ. But there is no difference in the form of the Derivative except in Swara. Illustrations follow the order of significance and not of case declensions as hereto-fore.

असमासे तु निष्कादेः टगार्हीयेन्यथा तु ठञ् ॥

यथा ॥ नैष्किकम् । परमनैष्किकम् ।

त्रिंशदन्तान्यसंख्याया अर्हीयार्थेषु कन् भवेत् ॥

यथा ॥ पञ्चभिः क्रीतइत्यादि पञ्चकः । तावता तावतिकः ।

तावत्कः । त्यन्तशदन्तात्तु । साप्ततिकः । चात्वारिंशत्कः ।
ठञ् ठञ्

आर्हीयेष्वेवमन्येषां विशेषो दृश्यते यथा ॥

विंशकः । त्रिंशकः । संज्ञायां तु विंशतिकः । त्रिंशत्कः । शतेन
डुन् डुन् कन् कन्

---

(1) टकि Example:—तुरंगेण क्रीतमित्यादि तौरंगिकं Bought in exchange for a horse &c. ठञि Example:—सप्तत्या क्रीतमित्यादि साप्ततिकम् bought for Rupees seventy &c. प्रास्थिकम् bought in exchange for a Prastha (measure). गौपुच्छिकम् bought in exchange for a Gopucha (cow). When the word निष्क &c occurs in a compound. ठञ् will follow; but when निष्क stands apart, the particle ठक् will come in. नैष्किकम् (ठक्) = bought with a Nishka ie, gold coin, परमनैष्किकम् (ठञ्) bought with an excellent Nishka, ie, gold coin. When words denoting number do not end in ति or शत्, the particle कन् will occur in the aforesaid significance. पञ्चभिः क्रीतइत्यादि पञ्चकः bought with five &c. तावता क्रीत इत्यादि तावतिकः or तावत्कः bought with so much &c. Exception साप्ततिकः (ठञ्) bought with seventy (ति termination). चात्वारिंशत्कः (ठञ्) bought with forty (शत् termination).

Special cases:—Examples:—

विंशकः (डुन्) bought with twenty. त्रिंशकः (डुन्) bought with thirty. संज्ञायान्तु when it signifies a name, in particular, it becomes विंशतिकः (कन्) and त्रिंशत्कः (कन्) respectively. शत्यः (यत्) or शतिकः (ठन्) bought with a hund-

शत्यः । शतिकः । शतं परिमाणं अस्य शतकः । समासे द्विश-
यत् ठन् कन् कन्
तकः । कंसेन कंसिकः । कंसिकी । अधिकः ॥ कार्षापणेन प्रति-
टिठन् टिठन् टिठन्
कः । कार्षापणिकोवा । शौर्पं । शौर्पिकं । शतमानेन शातमानम् ॥
टिठन् अञ् अण्
विंशतिकेन वैंशतिकम् । साहस्रं । वासनं ।
अण् अण् अण्

अध्यर्धपूर्वपदकाद्विगोश्चापीह लुक्स्मृतः ॥

यथा ॥ अध्यर्धकंसं । द्विकंसं । संज्ञायां नलुक् । पाञ्चकलायिकम् ॥

कार्षापणसहस्रान्तात्पूर्वोक्तात्लुग्विकल्प्यते ॥

यथा ॥ अध्यर्धकार्षापणं । अध्यर्धकार्षापणिकम् । द्विकार्षापणं ।
टिठन्
द्विकार्षापणिकम् । अध्यर्धप्रतिकम् । द्विप्रतिकम् । अध्यर्धसहस्रम् ॥
टिठन्
अध्यर्धसाहस्रम् । द्विसहस्रम् ॥ द्विसाहस्रम् ।
अण् अण्

---

red. शतं परिमाणं अस्य शतकः (कन्) That to which a hundred is the measure. But in a compound it becomes द्विशतकः (कन्) purchased for 200. कंसेन क्रीतः कंसिकः (टिठन्) bought for a Kamsa. अर्धिकः (टिठन्) bought for a half. कार्षापणेन क्रीतः प्रतिकः (टिठन्) or कार्षापणिकः (टिठन्) bought for a कार्षापणः. शौर्पम् (अञ्) or शौर्पिकं bought for a Soorpa. शतमानेन शातमानं (अण्) bought for a measure of hundred. वैंशतिकं (अण्) bought for twenty. साहस्रं (अण्) bought for a thousand. वासनं (अण्) bought for a cloth. In the case of द्विगु compound, the Tadhitha particle disappears. Eg:—अध्यर्धकंसं bought for one and a half Kamsa. द्विकंसं bought for two Kamsa. When the द्विगु compound denote a name the particle does not disappear. Eg:—पाञ्चकलायिकं name of a thing purchased with Panchakaloyam. अध्यर्धकार्षापणं or अध्यर्धकार्षापणिकं (टिठन्) bought for

निष्कबिस्ताद्द्वित्रिबहुपूर्वाल्लुक्तु विकल्पितः ॥

यथा ॥ द्विनिष्कम् । द्विनैष्किकम् । इत्यादि ॥ द्विबिस्तम् । द्विबैस्तिकम् । इत्यादि ॥ अध्यर्धविंशतिकीनम् । द्विविंशतिकीनम् ।
ख ख

अध्यर्धखारीकम् । द्विखारीकम् । खारीकम् । पणपादमाषशतान्ताद्वा ।
ईकन् ईकन् ईकन्

अध्यर्धपण्यम् । द्विपण्यम् । इत्यादि ॥ अध्यर्धशाण्यम् । अध्यर्धशाणम् । द्वैशाणम् । द्विशाण्यम् । द्विशाणम् । इत्यार्हीय साधा-
अण् यत्

रणाः ॥ धनलाभस्य निमित्तं संयोगः उत्पातोवा धानलाभिकः ॥ वातस्य कोपनं शमनं वा वातिकम् । पैत्तिकम् । श्लैष्मिकम् । सान्निपातिकम् ॥

---

one and a half Karshapana. *Note*:— The Tadhita particle may or may not disappear in the following:— द्विनिष्कं or द्विनैष्किकम् Bought for two Nishka. द्विबिस्तं द्विबैस्तिकं Bought for two Bistha. अध्यर्धविंशतिकीनं (ख) Bought for a twenty and its half. viz thirty. द्विविंशतिकीनं (ख) Bought for two twenties or forty. अध्यर्धखारीकं (ईकन्) Bought for one and a half Khari. द्विखारीकं (ईकन्) Bought for two Khari. खारीकं (ईकन्) Bought for a single Khari. अध्यर्धपण्यं Bought for one and a half Fanam. द्विपण्यं Bought for two Fanams.

This closes (Arhiya)

(1) धनलाभस्य निमित्तं धानलाभिकः Being a ground for acquisition of wealth.

(2) वातस्य कोपनं or शमनं वा वातिकं Tending to increase or diminish Vatha. पित्त पैत्तिकं Tending to increase or diminish Pitha or bile. श्लेष्म श्लैष्मिकं Tending to increase or diminish Sleshma (Phlegm). सन्निपात सान्निपातिकं Tending to increase or diminish Vatha Pitha & Sleshma.

यत्संख्यापरिमाणार्थाश्वादिभिन्नाक्च्यचश्च गोः ॥

यथा ॥ धनस्य निमित्तं संयोगः उत्पातोवा धन्यः । यशस्यः ॥ ब्रह्मवर्चस्यम् । पुत्रीयः । पुत्र्यः ॥ सर्वभूमेरीश्वरः तत्र विदितोवा
छ
सार्वभौमः । पार्थिवः । लोके विदितः लौकिकः । सार्वलौकिकः ।
अण् अण्
प्रस्थस्य वापः प्रास्थिकम् । क्षेत्रम् । द्रौणिकम् । पात्रिकम् ॥ पा-
ष्ठल
त्रिकी ॥ पञ्चास्मिन् वृद्धिः आयः लाभः शुल्कः उपदावादीयते प-
ञ्चकः ॥ पञ्चास्मिन् वृध्यादि दीयते पञ्चकः ॥ देवदत्तः ॥ द्वितीयः वृध्यादिः अस्मिन् दीयते द्वितीयिकः ॥ एवं पूरणप्रत्ययान्तात् तृ-
ठन्
तीयिकः ॥ इत्यादि ॥ भागो वृध्यादिरस्मिन् दीयते भाग्यम् ॥ भा-
यत्

यत् termination cases:— Example.

(3) धनस्य निमित्तं संयोगः उत्पातो वा धन्यः Indicating either the cause, acquisition, or token of wealth. यशस्यः Being the ground of fame or reputation. पुत्रीयः (छ) or पुत्र्यः being the cause for the birth of a son.

(4) सर्वभूमेरीश्वरः तत्र विदितो वा सार्वभौमः The Omnipotent or Omniscient. पृथिव्याः——पार्थिवः Lord of the country or one well known therein. लोके विदितः लौकिकः One renowned in the world. सार्वलौकिकः One well renowned in all the worlds.

(5) प्रस्थस्य वापः प्रास्थिकम् a field in which a Prastha of corn is sown. द्रौणिकम् a field in which a Throna of corn is sown. पात्रिकम् a field in which a Pathra of corn is sown.

(6) पञ्चास्मिन् वृद्धिः आयः लाभः शुल्कः उपदा वा दीयते पञ्चकः (कन्) That in which a portion of 5 interest, 5 in addition, 5 profit, 5 Kists and 5 bribe is given.

गिकम् । वंशभारं हरति वहति आवहति वा वांशभारिकः ॥ वस्निकः ॥
ठन्
द्रव्यकः ॥ प्रस्थं सम्भवति प्रास्थिकः ॥ कटाहः ॥ प्रस्थं अवहरति
कन्
पचति वा प्रास्थिकी ब्राह्मणी ॥ द्रोणं पचति द्रौणी ॥ आढकीना ॥
अण् ख
आढकिकी ॥ आचितीना ॥ आचितिकी ॥ पात्रीणा ॥ पात्रिकी ॥
ख ख
प्रस्थं परिमाणं अस्य प्रास्थिकः ॥ अष्टकम् ॥ पाणिनीयम् ॥ पञ्चदशमन्त्राः परिमाणं अस्य पञ्चदशः ॥ स्तोमः ॥ श्वेतच्छत्रमर्हति
छः
श्वैतच्छत्रिकः ॥ विरागं नित्यमर्हति वैराङ्गिकः ॥ शिरश्छेदं नित्यमर्हति शीर्षच्छेद्यः ॥ दण्ड्यः ॥ वध्यः ॥ अर्घ्यः ॥ कडंकरं माषादिका-

---

(7) वंशभारं हरति वहति आवहति वा वांशभारिकः one who either carries away, bears or helps in lifting up, a load of bamboos.

(8) प्रस्थं सम्भवति प्रास्थिकः producing a Prastha (measure).

(9) द्रोणं पचति द्रौणी (अण्) or द्रौणिकी a woman who can cook a Throna of corn.

(10) प्रस्थं परिमाणं अस्य प्रास्थिकः That to which a Prastha is the measure.

(11) अष्टकं पाणिनीयं a treatise of Panini consisting of 8 chapters.

(12) पञ्चदशः स्तोमः a portion of the Vedic hymn consisting of 15 Mantrams.

(13) श्वेतच्छत्रमर्हति श्वैतच्छत्रिकः one who deserves a white umbrella viz one deserving the throne.

(14) विरागं नित्यमर्हति वैरंगिकः one who has abandoned the world.

(15) शिरः छेदं नित्यमर्हति शीर्षच्छेद्यः one fit to be beheaded. दण्ड्यः one who deserves punishment. वध्यः one who

छम् ॥ तदर्हति कडंकरीयः ॥ गौः ॥ कडंकर्यः ॥ दक्षिणीयः ॥
छ यत् छ
दक्षिण्यः ॥ स्थालीबिलं अर्हन्ति स्थालीबिलीयाः ॥ स्थालीबिल्याः ॥
छ यत्
पाकयोग्या इत्यर्थः ॥ यज्ञियः ॥ आर्त्विजीनः ॥
घः

इत्यार्हीया इतश्चोर्ध्वं ठञेवौत्सर्गिकः स्मृतः ॥

पारायणं वर्त्तयति पारायणिकः ॥ छात्रः ॥ तौरायणिकः ॥ यजमानः ॥ चान्द्रायणिकः ॥ तपस्वी ॥ संशयं आपन्नः सांशयिकः ॥ योजनं गच्छति यौजनिकः ॥ पथिकः ॥ पन्थानं नित्यं गच्छति पान्थः ॥
ष्कन् ण

इतः परं कालवाचि शब्दादेव ठञादयः ॥

अह्नानिर्वृत्तं आह्निकम् ॥ मासं अधीष्टः भृतः भूतः भावी वा मासिकः ॥

---

deserves to be killed. अर्घ्यः one who deserves to be adored. कडंकरं अर्हति कडङ्करीयः or कडङ्कर्यः one that lives on straw viz a bullock. दक्षिणीयः (छ) or दाक्षिण्यः (यत्) A Brahmin who deserves Dakshina. स्थालीबिलीयाः (छ) or स्थालीबिल्याः (यत्) Rice fit to be cooked in a sthali or pot. यज्ञियः (घः) one fit to perform a sacrifice. आर्त्विजीनः (खञ्) one performing a sacrifice.

ठञ् termination cases:———Examples.

(1) पारायणं वर्त्तयति पारायणिकः one who recites veda viz a pupil.

(2) संशयं आपन्नः सांशयिकः one who is doubting.

(3) योजनं गच्छति यौजनिकः one who travels 8 miles (yojana). पन्थानं गच्छति पथिकः (ष्कन्) a journeyman; traveller. पन्थानं नित्यं गच्छति पान्थः (णः) a habitual traveller.

Hereafter the ठञ् &c particles appear in cases where words denoting only time occur.

(1) अह्नानिर्वृत्तं आह्निकं Done by the day-time.

मासं भृतः बालः मास्यः मासीनः ॥ द्वादशाहस्य दक्षिणा द्वादशा-
यत् खञ्
हिकी ॥ प्रावृषि दीयते कार्यं वा प्रावृषेण्यम् ॥ शारदम् ॥ काला-
एण्य
दिति निवृत्तम् ॥ यथाकथाचद्दीयते कार्यं वा याथाकथाचम् ॥ हस्ते-
न दीयते कार्यं वा हस्त्यम् । कर्णवेष्टनेन सम्पादि कार्णवेष्टनिकम् ।
यत्
मुखं । तेन शोभते इत्यर्थः । कर्मणा सम्पद्यते कर्मण्यम् । शौर्यम् ।
यत्
वेषेण सम्पद्यते वेष्यः । नटः । सन्तापाय प्रभति सान्तापिकः । यो-
यत्
गाय प्रभति योग्यः । यौगिकः । कर्मणे प्रभवति कार्म्मुकम् । समयः
यत् उकञ्

---

(2) मासं अधीष्टः भृतः भूतः भावी वा मासिकः one working for a month in return for a present; for wages; or one old by a month or about a month.

(3) मासम्भूतः मास्यः (यत्) मासीनः (खञ्) old by one month.

(4) द्वादशाहस्य दक्षिणा द्वादशाहिकी a Dakshina given in a द्वादशाह viz, a sacrifice occupying 12 days.

(5) प्रावृषि दीयते कार्यम् वा प्रावृषेण्यं (एण्य) that which is found or offered in the Pravrisha season. शरदि —— शारदं (अण्) what is offered in Sarad season (summer).

---

(1) याथाकथाचं (ण) given somehow.

(2) कर्णवेष्टनेन सम्पादि कार्णवेष्टनिकं what is adorned with rings &c on the ears viz face.

(3) कर्मणा सम्पद्यते कर्म्मण्यं (यत्) that which can be effected by work. वेष्यः (यत्) one who earns his livelihood by Vesha viz, an actor.

(4) सन्तापाय प्रभवति सान्तापिकः one suffering from anxiety or uneasiness. योगाय——योग्यः (यत्) यौगिकः a fortunate man. कर्मणे प्रभवति कार्मुकं (उकञ्) a bow fit for or used in battle.

प्राप्तोऽस्य सामयिकम् । ऋतुः प्राप्तोऽस्य आर्त्तवम् । काल्यम् ।
अण् यत्
शीतं। इन्द्रमहः प्रयोजनं अस्य ऐन्द्रमहिकम् । व्याकरणसमापनीयम् ।
छः
एकं अगारं प्रयोजनं अस्य ऐकागारिकः । चोरः ।

इति ठञधिकाराः ।

सर्वत्रार्थेषु पूर्वेषु स्त्रैणं पौंस्नमिति स्मृतम् ॥
स्त्रीवत्पुंवदिति प्रोक्तं वत्यर्थे नञ् स्नञौ न हि ॥

ब्राह्मणेन तुल्यं ब्राह्मणवत् । अधीते । मधुरायामिव मधुरावत् । स्रुघ्ने प्राकारः । चैत्रस्येव चैत्रवत् । मैत्रस्य गावः । वत्यन्तं अव्ययम् ॥

त्वतलौसर्वशब्देभ्यो विशेषविहितैस्सह ॥

स्त्रियाः भावः स्त्रैणम् । स्त्रीत्वम् । स्त्रीता । पुंसो भावः पौंस्नम् । पुंस्त्वं । पुंस्ता । गोः भावः गोत्वम् । गोता ॥

---

(5) समयः प्राप्तोस्य सामयिकः Befitting the occasion. ऋतुः — आर्त्तवं (अण्) Becoming the Rithu season. कालः — काल्यं (यत्) Befitting the time.

(6) इन्द्रमहः प्रयोजनमस्य ऐन्द्रमहिकं That which is befitting the Indra festival. व्याकरणसमापनीयं Tending to the completion of Vyakarana. ऐकागारिकः एकमगारं प्रयोजनमस्य one who fixes his eye on one house only viz a thief or robber.

This closes the ठञ् terminations.

स्त्रैणं Relating to woman. पौंस्नं Relating to men. स्त्रीवत् Like a woman. पुंवत् Like a man.

(1) ब्राह्मणेन तुल्यं ब्राह्मणवत् Like a Brahmin; as if an equal with Brahmin. मधुरायामिव मधुरावत् As in Madura. चैत्रस्येव चैत्रवत् As if it were Chaitra's.

वत्यन्तं अव्ययम् ——— वत् Indeclinable.

(1) गोः भावः गोत्वं (त्व) गोता (तल्) The nature or

त्वान्तं क्लीबं तलंतन्तु स्त्रियां पुंसीमनिच् स्मृतः ॥

पृथोर्भावः प्रथिमा । उचितस्य भावः औचित्यम् । औचिती । जड-
इमनिच् ष्यञ्
स्य कर्म भावो वा जाड्यम् । दूतस्य भावः कर्म वा दूत्यम् ॥
यत्

भावकर्मार्थका एव मन्येऽपि खलु सुग्रहाः ॥
साधिकारागताद्यूर्ध्वं इतो निरधिकारकाः ॥

यथा ॥ मुद्गानां भवनं क्षेत्रं मौद्गीनम् । व्रैहेयम् । शालेयम् ।
खञ् ढक् ढक्
यव्यम् । यवक्यम् । षष्टिक्यम् । तिल्यम् । तैलीनम् । सर्वपथान्
यत् यत् यत् यत् खञ्

---

characteristic of a cow. Note—— त्व—Neuter; तल्—— Feminine; इमनिच् —Masculine. पृथोः भावः प्रथिमा (इमनिच्) Greatness or magnificience. उचितस्य भावः औचित्यं (ष्यञ्) or औचिती Fitness; aptitude; capability. जडस्य कर्म भावो वा जाड्यं (यक्) Foolishness or foolish act. दूतस्य कर्म भावो वा दूत्यं (यक्) The duty of a messenger or embassy.

Similarly, the particles signifying भाव and कर्म are to be declined.

Here follow special cases— the general being at an end.

(1) मौद्गीनं (खञ्) मुद्गानां भवनं क्षेत्रं The soil on which green peas are reared. व्रैहेयं (ढक्) The oil where Vrihi corn is sown. शालेयं (ढक्) The field whereon Sali crop is reared. यव्यं (यत् or यवक्यं (यत्) The soil where Yava corn is sown. षष्टिक्यं यत्) The soil whereon Shashtika (60 days' crop) is sown. तिल्यं (यत्) तैलीनं (खञ्) The field in which gingelly seeds are sown.

(2) सर्वपथीनः (ख) सर्वपथान् व्याप्नोति Pervading all ways or in all directions.

न्याप्नोति सर्वपथीनः । आप्रपदं प्राप्नोति आप्रपदीनः । पटः । पुत्र-
खः खः
पौत्रं अनुभवति पुत्रपौत्रीणः । अध्वानं अलं गच्छति अध्वनीनः ॥
अध्वन्यः । अमित्राभिमुखं सुष्ठु गच्छति अभ्यमित्र्यः । अभ्यमि-
यत् यत् छः
त्रीयः । अभ्यमित्रीणः । एवमन्येऽपि संकीर्णाः ज्ञेयाः । गौः अ-
ख
स्यास्तीति गोमान् । दण्डी । दण्डिकः । शिखावलः । एवं अन्येपि
मतुप् इन् वलच्
मत्वर्थीयाः सुग्रहाः ॥

इत्थं सर्वे ऽपि सम्पूर्णा वाचकास्तद्धिता इह ॥

---

(3) आप्रपदं प्राप्नोति आप्रपदीनः(ख) Reaching down to the ankle.

(4) पुत्रपौत्रं अनुभवति पुत्रपौत्रीणः (ख) In possession or enjoyment till his sons and grandsons life-time.

(5) अध्वानं अलं गच्छति अध्वनीनः (ख) or अध्वन्यः (यत्) a journeyman or habitual traveller.

(6) अभ्यमित्र्यः (यत्) or अभ्यामित्रीयः (छ) अभ्यमित्रीणः (ख) one who faces the enemy.

एवमन्येऽपि संकीर्णा ज्ञेयाः—— So are others.

अथ मत्वर्थीयाः—— The following illustrate मत् terminations.

(1) गौः अस्य अस्मिन् वा अस्ति गोमान् (मतुप्) one who has cows. दण्डी (इन्) or दाण्डिकः (ठन्) one who has a stick in his hands. शिखावलः (वलच्) one who has a top-knot.

एवं अन्येऽपि मत्वर्थीयाः सुग्रहाः other words with मत् &c terminations are to be similarly dealt with.

This closes the वाचकतद्धिताः.

अथ द्योतकतद्धिताः ॥

अव्ययत्वं विभक्तित्वं प्राप्तास्ते तसिलादयः ॥

कस्मात् कुतः । सर्वस्मात् सर्वतः । बहुतः । यत्र । तत्र । क्व । कुत्र । इत्यादयः । विग्रहे प्रयोजनाभावेन उपेक्षिताः ॥

अनव्ययरूपा यथा ॥

कुत्सितो भिषक् भिषक्पाशः । द्वितीय एव द्वैतीयीकः । तार्त्तीयीकः । आढ्यो भूतपूर्वः आढ्यचरः । कृष्णस्य भूतपूर्वो गौः कृष्णरूप्यः । कृष्णचरः । अतिशयेन आढ्यः आढ्यतरः । आढ्यतमः । लघुतरः । लघुतमः । लघीयान् । अतिशयेन पचति पचतितराम् । पचतितमाम् । प्रशस्तः । पटुः पटुरूपः । प्रशस्तं पचति

This begins the द्योतक class.

Indeclinable.

कस्मात् कुतः (तसिल्) whence(Ablative). सर्वस्मात् सर्वतः from all(Ablative). बहुतः from many (Ablative). यत्र (त्रल्) where. तत्र There. क्व or कुत्र Where?

अनव्ययरूपा यथा— Declinable.

कुत्सितो भिषक् भिषक्पाशः Quack-doctor. द्वितीय एव द्वैतीयीकः Second, तार्त्तीयीकः Third. आढ्यो भूतपूर्वः आढ्यचरः a person who was once wealthy. कृष्णस्य भूतपूर्वो गौः कृष्णरूप्यः or कृष्णचरः That was once with Krishna. अतिशयेन आढ्यः आढ्यतरः wealthier (comparative). आढ्यतमः wealthiest of all (Superlative). लघुतरः Lighter (Comparative). लघुतमः Lightest (Superlative). लघीयान् Lighter (Comp). लघिष्ठः Lightest (Superlative). अतिशयेन पचति पचतितरां cooking better (Comparative). पचतितमां cooking best (Superlative). प्रशस्तः पटुः पटुरूपः Exceedingly clever.

पचतिरूपम् । ईषदूनो विद्वान् विद्वत्कल्पः । विद्वद्देश्यः । विद्वद्देशीयः । ईषन्नूनं पचति पचतिकल्पम् । पटुप्रकारः पटुजातीयः । अश्व इव प्रतिकृतिः अश्वकः । चञ्चेव चञ्चा । जीविकार्था अविक्रेयाः । वासुदेव इव प्रतिकृतिः वासुदेवः । शिवः । स्कन्दः । शिलेव शिलेयम् । शैलेयम् । कुशाग्रमिव कुशाग्रीया । बुद्धिः । काकतालमिव काकतालीयम् । अभूत तद्भावे च्विः । अकृष्णं कृष्णं सम्पद्यमानं करोति कृष्णीकरोति । कृष्णीभवति । गङ्गीस्यात् । मात्रीकरोति । उच्चक्षूकरोति । विचेतीकरोति । कृत्स्नं शस्त्रं अग्निः सम्पद्यते अग्निसाद्भवति । अग्नीभवति । राजाधीनं करोति राजसात्करोति । विप्राधीनं करोति विप्रत्राकरोति । देवं देवत्रा । वन्दे । देवे देवत्रा । रमे । इत्यादि । कृष्णीभवतीत्यारम्य अव्ययानि ॥

प्रशस्तं पचति पचतिरूपं cooking well. ईषदूनो विद्वान् विद्वत्कल्पः or विद्वद्देश्यः or विद्वद्देशीयः approaching the standard of a learned man; a proficient. ईषदूनं पचति पचतिकल्पं a tolerably clever cook. पटुप्रकारः पटुजातीयः Looking like a clever or able man. अश्व इव प्रतिकृतिः अश्वकः Counterfeit (form) of horse. चञ्चेव चञ्चा a figure of a man made of straw.

जीविकार्था अविक्रेयाः These indicate the class of words which signify what is to be a source of livilihood and not what is to be a barter or sale.

वासुदेवइव प्रतिकृतिः वासुदेवः Idol of Vasudeva. शिवः Idol of Siva. स्कन्दः Idol of God Subramania.

शिलेव शिलेयं or शैलेयं Resembling a stone. कुशाग्रमिव कुशाग्रीया । बुद्धिः sharp as a Koosa grass. काकतालमिव काकतालीयं accidentally brought about.

अभूततद्भावे च्विः — Indeclinable particle च्विः.

अकृष्णं कृष्णं सम्पद्यमानं करोति कृष्णीकरोति कृष्णीभवति makes

समासान्ताः स्वार्थिकास्तु तद्धिताः केचन स्मृताः ॥
समासवृत्तौ तेषां तु विग्रहस्तु प्रदर्शितः ।
पुनस्वरूपविज्ञप्त्यै लिख्यन्तेऽत्रापि केचन ॥

तत्राव्ययीभावसमासान्ता यथा ॥

शरदः समीपं उपशरदम् । उपराजम् । उपचर्म्मम् । उपचर्म्म । उपनदम् । उपनदि । उपपौर्णमासम् । उपपौर्णमासि । उपसमिधम् ! उपसमित् । उपगिरम् । उपगिरि । तत्पुरुषे यथा ॥ द्वे अंगुली प्रमाणं अस्य द्व्यंगुलम् । निर्गतं अंगुलिभ्यः निरंगुलम् ।

---

or becomes black. गंगीस्यात् will become Ganga. मात्रीकरोति Becomes a mother. उच्चक्षूकरोति cause one to look up विचेतीकरोति make one unconscious or senseless. कृत्स्नं शस्त्रं अग्निः सम्पद्यते अग्निसाद्भवति or अग्नीभवति Becomes or is turned into fire. राजाधीनं करोति राजसात्करोति Surrender to the king. विप्राधीनं करोति विप्रत्रा करोति Surrender to a Brahmin देवं देवत्रा । वन्दे; (त्रा Accusative). देवे देवत्रा । रमे (त्रा Locative)

कृष्णीभवतीत्यारभ्य अव्ययानि; Indeclinable.

The Tadhita particle here under mentioned has no seperate significance; but its analysis though dwelt upon in Samasa Vrithi is also referred to in a passing way in what follows:—

तत्र अव्ययीभावसमासान्ताः— Avyayibava Samanthas.

शरदः समीपं उपशरदं near the Sarada season or approaching the Sarad season. उपराजं next to the king. उपचर्मम् or उपचर्म next to the skin. उपनदं or उपनदि adjoining the river. उपपौर्णमासं or उपपौर्णमासि close to the Full-Moon day. उपसमिधं or उपसमित् near the Samith. उपगिरं or उपगिरि near the mountain.

तत्पुरुषे यथा—Thathpurusha compound; Examples.

द्वे अंगुली प्रमाणं अस्य द्व्यंगुलं measuring two inches. निर्गतं अंगुलिभ्यः निरंगुलं measuring over an inch. सर्वा रात्रिः

सर्वा रात्रिः सर्वरात्रः । पूर्वं रात्रेः पूर्वरात्रः । द्वयोः रात्र्योस्स-माहारः द्विरात्रम् । परमराजः । अतिराजः । उत्तमाहः । कृष्ण-सखः । अतिश्वः । वराहः । उत्तरसक्थम् । मृगसक्थम् । फलक-मिव सक्थि फलकसक्थम् । समाहारे यथा । द्विनावम् । त्रिनावम् । नावोऽर्धं अर्धनावम् । द्व्यञ्जलम् । द्व्यञ्जलि । कुब्रह्मः । कुब्रह्मा । महाब्रह्मः । महाब्रह्मा । चित्रागौः चित्रगवी । पुमान्गौः पुंगवः । बहुव्रीहौ यथा ॥ उतदशाः । दीर्घसक्थः । जलजाक्षः । पञ्चा-गुलम् । दारु । द्विमूर्धः । त्रिमूर्धः । अविद्यमाना प्रजा यस्य सः अप्रजाः अप्रजसौ अप्रजसः । सुप्रजाः । अमेधाः । सुमेधाः । युवतिर्जाया यस्य सः युवजानिः । उद्गन्धिः । पूतिगन्धिः । सुर-

---

सर्वरात्रः the whole night. पूर्वम् रात्रेः पूर्वरात्रः The fore-part of the night. द्वयोः रात्र्योः समाहारः द्विरात्रं Two nights put together. परमराजः Excellent king. अतिराजः Supreme king. उत्तमाहः a fine day; a happy day. कृष्णसखः a friend of Krishna. अतिश्वः । वराहः greater than a dog; viz a pig. उत्तरसक्थं The hind-part of a man's thigh. फलकसक्थं The hind thigh resembling a plank. द्विनावं Two ships put together. त्रिनावं three ships put together. नावो अर्धम् अर्धनावं one half of a ship. द्व्यंजलं or द्व्यंजलि Two hand-fuls. कुब्रह्मः or कुब्रह्मा a bad Brahmin. चित्रा गौः चित्र-गवी a pretty cow. पुमान् गौः पुंगवः a bullock.

बहुव्रीहिसमासांताः — Bahuvrihi Compound.

उपदशाः about 10; 9 or 11. दीर्घसक्थः with long thighs. जलजाक्षः Lotus-eyed person. पञ्चांगुलं (दारु) measuring five inches. द्विमूर्धः Two-headed person. त्रिमूर्धः Three-headed person. अविद्यमाना प्रजा यस्य सः अप्रजाः अप्रजसौ one without a child or issue. एव Thus. अमेधाः Idiot. सुमेधाः sage; wise man. युवतिर्जाया यस्य सः युवजानिः one having a young wife. उद्गन्धिः with blown out fragrance. पूतिगन्धिः Emitting bad

भिगन्धिः । सूपस्य गन्धो लेशो यस्मिन् सूपगन्धि भोजनम् । पद्म-गन्धि । द्वौ दन्तौ यस्य द्विदन् द्विदन्तौ द्विदन्तः । महायशस्कः । महायशाः । द्वन्द्वे यथा ॥ वाक्त्वचम् । त्वक्स्रजम् । शमीदृषद-म् । वाक्त्विषम् । छत्रोपानहम् । सर्वसमासान्ता यथा ॥
अर्धर्चः । बह्वृचः । विष्णुपुरम् । विमलापं सरः । राजधुरा । रम्यप-थः । पद्मनाभः ॥ क्वचित्समासान्ता न ॥ यथा ॥ सुराजा । अ-तिराजा । किंराजा । किंसखा । किंगौः । अराजा । असखा ॥

एवमन्येऽपि विज्ञेया यथा लक्ष्यं विचक्षणैः ।

---

odour. सुरभिगन्धिः Emitting good odour. सूपगन्धि having a small quantity of Daul. पद्मगन्धि with the fragrance of a lotus. द्वौ दन्तौ यस्य सः द्विदन् द्विदन्तौ having only two teeth. महायशस्कः or महायशाः one far-famed or renowned.

Dwandva Compounds.

Example:— वाक्त्वचं Union of mouth and skin. त्वक्स्रजं Union of skin and garland. शमीदृषदं collection of Sami creepers and stones. वाक्त्विषं Union of mouth and light. छत्रोपानहं Umbrella and shoe together.

सर्वसमासान्ताः Sarva Samasa Compounds.

Example:— अर्धर्चः one half of a Rig—a Vedic hymn. बह्वृचः one who studies the Rig. विष्णुपुरं Town of Vishnu. विमलापं a clear water tank. राजधुरा Burden of a king. रम्यपथः an admirable road. पद्मनाभः one with a lotus-like Navel pit.

क्वचित्समासान्ता न No Samasantha in certain cases.

Example:— सुराजा a good king. किंसखा a bad friend. किंगौः a bad cow. अराजा one not a king. असखा

अलेखिषतनास्माभिर्येयं तु विस्तरभीरुभिः ॥
सुखबोधाय रचिते वृत्तिविग्रहसङ्ग्रहे ।
तृतीया वृत्तिरभवत्सम्पूर्णा तद्धिताभिधा ॥

॥*॥ इति तद्धितवृत्तयः ॥*॥

अथ कृद्वृत्तयः ॥

कृतो बहुविधास्तत्र कृत्यसंज्ञास्तु केचन ॥
ते कर्तृकर्म्मभावेषु विद्यमानास्त्रिधा स्मृताः ॥

तत्र कर्त्तरि कृत्यो यथा ॥ वसतीति वास्तव्यः । पच्यन्ते स्वयमेव पचेलिमाः । माषाः । भिद्यन्ते स्वयमेव भिदेलिमानि । काष्ठा-

---

friendless person. Other Tadhitha compounds should be similarly dealt with; they are omitted here lest they should occupy too much space in this small treatise; The third part ,viz, Thadhitha Vrithi of this Vrithi Vigraha Sangraha treatise closes here.

Krid Vrithi.

We now proceed to treat of Krid Vrithi:—

There are many Krid suffixes; some of them are named कृत्य, they govern कर्त्तृ, कर्म and भाव.

(1) Examples of कर्तरिकृत्य are,

वसतीति वास्तव्यः, one who resides, Suffix तव्य and root वस्. पच्यन्ते स्वयमेव पचेलिमाः (माषाः) Black grain that grows of itself. भिद्यन्ते स्वयमेव भिदेलिमानि (काष्ठानि) Logs of wood that break of themselves. suffix. केलिमर् &roots पच् and भिद्.

नि । कर्म्मणि यथा । पक्तव्यः । पचनीयः । ओदनोभवता । भावे यथा । कर्त्तव्यम् । करणीयम् । वा । भवता । इति कृत्याः ।

कालत्रये कर्त्तरि स्युः केचन ण्वुल्तृजादयः ॥

यथा ॥ करोतीति कर्त्ता । कारकः । हर्त्ता । हारकः । नन्दयति नन्दनः । मदयति मदनः । मधुं सूदयति मधुसूदनः । गृह्णातीति ग्राही । पचतीति पचः । प्रतिष्ठतीति प्रस्थः । उत्पिबतीत्युत्पिबः ।

---

(2) Examples of कर्मकृत्य are,

पक्तुं योग्यः पक्तव्यः or पचनीयः(ओदनो भवता) Food that ought to be cooked by you. suffix तव्य or अनीय and root पच्.

(3) Examples of भावकृत्य,

कर्तव्यं or करणीयं(भवता) Action by youie your action. suffix तव्य or अनीय and root कृ.

Thus ends कृत्यप्रत्यय.

ण्वुल् तृच् and other Krid suffixes in addition to governing a कर्ता are used in all the three tenses.

(1) करोतीति कर्ता or कारकः The doer or maker. suffix तृ,or ण्वुल् ie अक and root कृ.

(2) हरतीति हर्त्ता or हारकः one who takes away by force; plunderer. The same suffix and root हृ.

(3) नन्दयतीति नन्दनः, one who delights others. suff ल्यु(अन) and root नन्द्. मदनः and मधुसूदनः &c are formed in the same way.

(4) गृह्णाति ग्राही one who receives. suffix इन् and root गृह्.

(5) पचतीति पचः one who cooks. suffix अच् and root पच्.

(6) प्रतिष्ठते इति प्रस्थः one who starts. Suffix क and root स्था with प्र.

(7) उत्पिबतीति उत्पिबः one who drinks. suffix श and

उज्जिघ्रतीति उज्जिघ्रः । उद्धमति उद्धमः । ददाति ददः । दायः । गायति गाथकः । गायनः । कुम्भं करोति कुम्भकारः । शंकरः । खे शेते खशयः । कुरुषु चरति कुरुचरः । पुरः सरति पुरःसरः । अग्रतस्सरः । अग्रेसरः । पूर्वः सरति पूर्वसरः । कर्मकरः । शब्दकारः । श्लोककारः । कलहकारः । स्तम्बं करोति

---

root घ्रा with उत्. उज्जिघ्रः and उद्धमः are also formed in the same way.

(8) ददातीति ददः or दायः one who gives. suffix श or ण and root दा.

(9) गायतीति गाथकः or गायनः a professional singer. suffix थकन् and ण्यु (अन) and root गै.

The above nine examples are निरुपपद, without any word at the beginning; the following are examples of सोपपद, with a word at the beginning.

(1) कुंभं करोतीति कुंभकारः, a potter. suffix अण् and root कृ.

(2) शं करोतीति शंकरः, one who does good ie Godson suffix अ and root कृ and शं indeclinable.

(3) खे शेते खशयः, one who sleeps in the sky. same suffix and root शी.

(4) कुरुषु चरतीति कुरुचरः, one who is wandering about in the land of Kurus. same suffix and root चर्. पुरस्सरः अग्रतस्सरः and अग्रेसरः all meaning one who sees in front are formed in the same way. The first words are indeclinable.

(5) पूर्वः सरतीति पूर्वसरः, one who goes in front. The first word is in this case a noun.

(6) कर्म करोतीति कर्मकारः, one who does work ie servant suffix अ and root कृ.

(7) शब्दकारः one who makes noise. श्लोककारः one who

स्तम्बकरिः । व्रीहिः। शकृत्करिः । वत्सः । फलानि गृह्णाति फलेग्रहिः । आत्मानं बिभर्तीति आत्मंभरिः ॥ जनं एजयति जनमेजयः ॥ स्तनं धयति स्तनन्धयः ॥ नाडिं धमति नाडिन्धमः ॥ कूलं उद्रुजति कूलमुद्रुजः ॥ कूलं उद्वहति कूलमुद्वहः ॥ अभ्रं लेढि अभ्रंलिहः ॥ प्रस्थं पचति प्रस्थम्पचा ॥ स्थाली ॥ मितंपचा ॥ नखंपचा ॥ विधुं तुदतीति विधुन्तुदः ॥ सूर्यं न पश्यन्ति असूर्यम्पश्याः ॥ राजदाराः ॥ पाणयो ध्मायन्ते एष्विति पाणिन्धमाः ॥

---

composes slokas; and कलहकारः have अण् for their suffix and कृ for their root.

(8) स्तम्बं करोतीति स्तम्बकरिः(व्रीहिः) grains growing luxuriantly; suffix इन्.

(9) शकृत्करिः(वत्सः) The calf that is always puping stools; suffix इन्.

(10) फलानि गृह्णातीति फलेग्रहिः The tree that bears fruit. फले is not the locative of फल but is only another form of it.

(11) आत्मानं बिभर्तीति आत्मम्भरिः one who fills his belly; a glutton. suffix the same.

(12) जनं एजयतीति जनमेजयः one who makes others tremble–the name of a king. suffix खश् and root एजि (causal); of the same kind are the following: स्तनन्धयः नाडिन्धमः कूलमुद्रुजः कूलमुद्वहः अभ्रंलिहः प्रस्थंपचः मितंपचः नखंपचः विधुन्तुदः सूर्यंनपश्यन्तीति असूर्यम्पश्याः wives of kings who never see the sun.

(13) पाणयः ध्मायन्ते एष्विति पाणिन्धमाः roads; because people clap their hands when they walk in the dark to frighten away serpents. suffix the same; but in the last the suffix instead of governing कर्ता governs the अधिकरण.

पन्थानः ॥ प्रियं वदति प्रियंवदः ॥ वाचं यच्छति वाचंयमः ॥ सर्वं कषति सर्वंकषः ॥ क्षेमंकरः ॥ अनाढ्यः आढ्योभवति आढ्यंभविष्णुः ॥ आढ्यम्भावुकः ॥ पुनः पुनः कषायं पिबन्ति कषाय पायिनः ॥ गान्धाराः ॥ दर्शनीयं आत्मानं मन्यते दर्शनीयम्मन्यः ॥ दर्शनीयमानि ॥ करणे यथा ॥आशितो भवत्यनेन आशितम्भवः ॥ ओदनः ॥ अनाढ्यं आढ्यंकुर्वंत्यनेन आढ्यंकरणम् ॥ भावे यथा ॥ आशितंभवम् ॥ वर्त्तते ॥ इति कालत्रयसाधारणाः कृतः ॥ अथ

---

(14) प्रियं वदतीति प्रियंवदः one who talks pleasingly. suffix खच् (अ) and root वद्. वाचंयमः one who is silent; सर्वङ्कषः one who thinks deep; क्षेमंकरः one who does good; are all formed in the same way.

15. अनाढ्यः आढ्योभवतीति आढ्यम्भविष्णुः or आढ्यम्भावुकः (one who was once poor and has become rich) suffix. खिष्णुच or खुकञ् Rt. भू.

N. *B.* In compounds (11 to 15) the ending म् of the first words आत्मन्&जन &c is not the termination of the accusative but only an augment मुम्. पुनः पुनः कषायं पिबन्तीति कषायपायिनः (Persons who drink decoction frequently) suffix. णिनि and Rt. पा. दर्शनीयं आत्मानं मन्यते दर्शनियंमन्यः or दर्शनीयमानी (one who thinks oneself beautiful) ie prides oneself on one's beauty suffix खश् or णिनि In the following examples, the suffix governs the करण आशितो भवत्यनेन आशितम्भवः (Food ie That by which one becomes satisfied). suffix खश् and Rt. भू. अनाढ्यं आढ्यं-कुर्वन्त्यनेन आढ्यंकरणम् (that by which a poor man is made rich). suffix same and Rt. कृ. The following is an example in which the suffix governs भाव. आशितंभवम् (being satisfied).

The following are used only in the Past tense.
कर्तरि कृत्:—

भूतार्थिकारीयाः कर्त्तरि यथा ॥ अग्निष्टोमेन इष्टवान् अग्निष्टोमयाजी ॥ मातुलं हतवान् मातुलघाती ॥ वृत्रं हतवान् वृत्रहा ॥ अग्निं चितवान् अग्निचित् ॥ पारं दृष्टवान् पारदृश्वा ॥ राजानं योधितवान् राजयुध्वा ॥ मन्दुरायां जातः मन्दुरजः ॥ पंकात् जातं पंकजं ॥ पुमांसं अनुजातः पुमनुजः ॥ न जातः अजः ॥

निष्ठासंज्ञाः कर्तृकर्मभावेषु त्रिविधाः स्मृताः ॥

क्रमेण यथा ॥ भुक्तवान् ॥ भवानोदनं ॥ भुक्तः ॥ ओदनोभवता ॥ गतं ॥ तेन ॥

---

1. अग्निष्टोमेन इष्टवान् अग्निष्टोमयाजी (one who has performed the अग्निष्टोम sacrifice).

2. मातुलं हतवान् मातुलघाती (one who has killed one's maternal uncle; ie Krishna) 1 and 2. suffix. णिनि.

3. वृत्रं हतवान् वृत्रहा (He who has killed the giant वृत्र ie Indra)

4. अग्निं चितवान् अग्निचित् (one who has performed the अग्निचयन sacrifice) 3 & 4. suffix. क्विप्.

5. पारं दृष्टवान् पारदृश्वा (one who has seen the extreme limits).

6. राजानं योधितवान् राजयुध्वा suffix. क्वनिप् & Rt दृश् & युध्.

7. मन्दुरायां जातः मन्दुरजः

8. पङ्कात् जातं पङ्कजं

9. पुमांसमनुजातः पुमनुजः (one who is born after a son

10. न जातः अजः 7 to 10. suffix. ड & Rt. जन्.

The following are called निष्ठा & govern कर्ता कर्म & भाव these also are used only in the Past tense.

कर्तरिकृत्. I. भुक्तवान् (भवानोदनं) you have taken your meals.) suffix. क्तवत् Rt. भुज्.

कर्मणिकृत् 2. भुक्तः (ओदनः भवता) the food has been eaten by you) past pass part. क्त-

भावकृत्. 3. गतं (तेन) His going.

इच्छाधीपूजनार्थेभ्योनिष्ठास्याद्वर्त्तमानके ॥

यथा ॥ राज्ञां मतं इष्टं । बुद्धं ज्ञातं । पूजितं अर्चितं ॥ इत्यादयः ॥ इति भूताधिकारीयाः ॥

लादेशा स्त्रिविधाः कर्तृकर्मभावेषु सम्मताः ॥

कर्तृलादेशो भूते यथा ॥ ससाद सेदिवान् ॥ उवास ऊषिवान् ॥ शुश्राव शुश्रुवान् ॥ वर्त्तमाने यथा ॥ पचन् ॥ पचमानः ॥ भविष्यति यथा ॥ कटं करिष्यन् ॥ करिष्यमाणः ॥ कर्मलादेशः वर्तमाने यथा ॥ पच्यमानः ओदनस्तेन । भविष्यति यथा ॥ करिष्यमाणः घटः तेन ॥ भावे लादेशो यथा ॥ भूयमानम् ॥ तेन ॥ लक्षणे यथा ॥ शयानाः ॥ भुञ्जते यवनाः ॥ हेतौ यथा ॥ अधीयानो वसति ॥ अध्ययनाय वसतीत्यर्थः ॥ इति लादेशाः ॥

Exceptions: In the case of roots meaning "to device' 'know', or 'adore', the suffix क्त denotes the present & *not* the past. eg. मतं इष्टं बुद्धं and ज्ञातं पूजितं अर्चितं.

लादेशा are of three kinds; they govern कर्ता कर्म or भाव. कर्तरि eg. Past. ससादेति सेदिवान्; उवासे ति ऊषिवान्; शुश्रावेति शुश्रुवान्. suffix. क्वसु Past Participle.

Pres. पचतीति पचन् or पचमानः suffix. अत् or आन or मान pres. part.

Future. करिष्यन् or करिष्यमाणः suffix अत् or आन or मान fut. part.

कर्म past none. pres. पच्यते इति पच्यमानः (that which is cooked) suffix. आन or मान.

Fut. करिष्यमाणः (that which is to be done) भाव eg. भूयमानं (being the state) suffix. आन

खलर्थाः केचन कृतः कर्मभावार्थकाः द्विधा ॥
कर्मणि यथा ॥ ईषत्करः ॥ सुकरः ॥ दुष्करः ॥ घटस्तेन ॥ ईषत्पानः ॥ सोमोभवता ॥ भावे यथा ॥ ईषदाढ्यंभवं ॥ भवता ॥ इति खलर्थाः ॥

वर्तमाने च भूते च भवन्त्येव ह्युणादयः ॥
यथा ॥ वायुः । पायुः ॥ कारुः । इत्यादयः ॥

केचित्त्वव्ययरूपास्स्युः कृतः क्त्वाप्रत्ययादयः ॥
यथा ॥ भुक्त्वा व्रजति ॥ भोक्तुं व्रजति ॥ भोजंभोजं व्रजति ॥

एवमन्येऽपि भूतार्था वर्तमानार्थका अपि ॥
भविष्यदर्थकाश्चापि सुविज्ञेयाविचक्षणैः ॥
सुखबोधाय रचिते वृत्तिविग्रहसङ्ग्रहे ॥
तुरीयैषा हि कृद्वृत्तिस्सम्पूर्णा समभूत्तराम् ॥
श्रीगुरुभ्यो नमः । श्रीगणेशाय नमः ॥

The following are खलर्थकृत् these govern कर्म & भाव कर्मणि eg. ईषत्करः; सुकरः; दुष्करः suffi. खल्. भाव. eg. ईषदाढ्यं भवं.

The following उण् & other suffixes denote both the past & the present वातीति वायुः &c.

Some suffixes are indeclinable; these are त्वा तुमुन् and णमुल् and denote either the past or the future. eg. भुक्त्वा व्रजति past. भोक्तुं व्रजति fut. भोजं भोजं व्रजति He goes out as often as he eats which he does frequently.

The student should make out on the same principles other compounds of which the above are examples.

Thus ends the 4th कृद्वृत्ति of this book. वृत्तिविग्रहसङ्ग्रह

अथ सनाद्यन्तवृत्तयः ॥

सनाद्यन्ता भ्वादयश्च धातवो द्विविधा मताः ।
तेभ्यो दशलकारास्युर्द्विविधेभ्यो लडादयः ॥
लङ्लिटौ लुट् तथा लृट् च लेङ्लोटौ लङ् लिङौ ततः ॥
लुङ् लृङौ चेति दश ते लेट् छन्दोमात्रगोचरः ॥
वर्त्तमानक्रियावृत्तेर्धातोः प्रायेण लड्भवेत् ॥
लिट् तु भूतानद्यतनपरोक्षे परिकीर्तितः ॥
लुडनद्यतने काले भविष्यति भवेदयम् ॥
लृड्भविष्यति शुद्धेस्याद्विष्यादौ लोट् तथाशिषि ॥

Sanadyantavrithi.

सनाद्यन्ताः— Roots are of two kinds; सनाद्यन्त and भ्वादि. सनाद्यन्त are those that are formed by the adding of सन् क्यच् and other terminations to any root or nominal base. They are of twelve kinds correspon-ding to the twelve terminations.

भ्वादि are also divided into ten classes called con-jugations.

तेभ्योदश:— These are divided in ten different tenses namely. लट् लिट् लुट् लृट् लेट् लोट् लङ् लिङ् लुङ् लृङ् of these लेट् is made use of only in the vedas.

वर्तमान:— As a rule लट् (present tense) denotes the present; and लिट् (perfect tense) any past event not seen by the person and that has not occurred since 12 the night previous.

लुडनद्यतने: — लुट् (first future) denotes an event that is to occur after twele this night.

लृड्भविष्यति:— लृड् (second future) that which is to oc cur before twelve this night.

भूतेनद्यतने लङ्स्यात् लोडर्थेष्वेव लिङ् भवेत् ॥
भूतसामान्यकालार्थवृत्तेर्धातोस्तु लुङ् मतः ॥
हेत्वादौ स्यादनिष्पत्तौ क्रियाया लृङ् भविष्यति ॥
पुनश्च ते त्रिधा कर्तृकर्म्मभावार्थकास्स्मृताः ॥
अष्टादशस्युरादेशाल्लकाराणां तिबादयः ॥
तेषां तु पूर्वं नवकं परस्मैपदसंज्ञकम् ॥
आत्मनेपदमित्याहुरुत्तरं नवकं बुधाः ॥
प्रत्येकं नवके तत्र प्रथमो मध्यमस्तथा ॥
उत्तमश्चेति पुरुषास्त्रिधाद्य नवके ततः ॥

विध्यादौलोट्— लोट् (imperative) implies command, benediction &c.

भूतेनद्यतने.— लङ् (imperfect) denotes any past event that has occurred before twelve last night, but which might have been seen by the speaker.

लोडर्थेष्वेव.- लिङ् is divided into two.- विधिलिङ् (potential) and आशीर्लिङ् (Benedictive); of which, the former is used in command &c while the latter is used only in benediction.

भूतसामान्य.- लुङ् (aorist) denotes any past event that has occurred since twelve last night.

हेत्वादौस्यात्.- लृङ् (conditional or 3rd future) is used in those conditional sentences, in which the non-performance of an action is implied.

पुनश्च ते- Verbs are conjugated in three voices. namely; कर्तरि कर्मणि & भावे ie active, passive and impersonal.

अष्टादश.— There are eighteen terminations for each of the ten tenses; nine of which are used in the Parasmipada, and the other nine in the Atmanipada.

प्रत्येकंनवके.- There are also three persons.

तिप्तस् झयश्च सिप् थस्था मिब्वस्मसइति क्रमात् ॥
त्रिकं त्रिकं हि प्रथममध्यमोत्तमसंज्ञितम् ॥
एवं द्वितीयनवके तातांझाः प्रथमः स्मृतः ॥
थासाथां ध्वं द्वितीयः स्यादिड्वहि महिङुत्तमः ॥
तिङर्थे युष्मदि सति मध्यमोऽस्मादितूत्तमः ॥
शेषे प्रथमएकद्वि बहुत्वक्रमतो भवेत् ॥
शवादयो विकरणा मध्ये धातुलकारयोः ॥

प्रथमपुरुष third person. मध्यमपुरुष second person. उत्तमपुरुष first person.

The terminations of the Parasmipada are:

	sing.	dual	plural
प्रथमपुरुषः—	तिप्	तस्	झि.
मध्यमपुरुषः—	सिप्	थस्	थ
उत्तमपुरुषः—	मिप्	वस्	मस्

of the Atmanipada are:

प्रथमपुरुषः—	त	आतां	झ
मध्यमपुरुषः—	थास्	आथां	ध्वं
उत्तमपुरुषः—	इट्	वहि	महिङ्

तिङर्थेयुष्मदि:— When the termination denotes युष्मद् as the author of the action then the verb is in the मध्यमपुरुष (second person).

अस्मदितु— And when it denotes अस्मद् the verb is in the उत्तमपुरुष (first person).

शेषेप्रथमः— When it denotes any other as the author then the verb is in the प्रथमपुरुष (third person).

एकद्वि &c — The singular, dual and plural forms are used according as the nominative is singular, dual or plural.

शबादयः— शप् and other conjugational signs come between the root and the terminations.

धातूनामपि रूपाणि लिख्यन्तेऽत्र प्रसङ्गतः ॥
अकर्म्माणस्सकर्माणो द्विकर्म्माणस्त्रिधा हि ते ॥
सकर्म्मकेभ्यो धातुभ्यो लकाराः कर्त्तृकर्म्मणोः ॥
स्युरकर्म्मकधातुभ्यो लकाराः कर्त्तृभावयोः ॥
दशगण्यां विभज्यैव धातुपारायणादिषु ॥
पठितास्तत्क्रमेणैव लिख्यन्तेह्यत्र ते मया ॥

भू— सत्तायाम् ॥

अयं धातुः शब्विकरणः परस्मैपदी अकर्मकः तत्र कर्तरि वर्तमाने

Since the सनाद्यन्त roots are conjugated in the same way as the भ्वादि, and since the latter are the more important ones; we shall first of all treat of the latter.

Verbs are either अकर्मक (intransitive) or सकर्मक (transitive); सकर्मक roots govern an object, or sometimes two; while the former have no object to govern. सकर्मकेभ्यो — सकर्मक roots are used either in the active voice ie कर्तरि or in the passive (कर्मणि) while अकर्मक roots are used either in the active voice ie कर्तरि or the impersonal भावे.

दशगण्यां — Panini divides roots into ten classes. We treat of them in the same order as observed therein.

Active voice.

भू(सत्तायां) to be or become.

शब्विकरणः(Ist conj). परस्मैपदी. अकर्मक(intr).

लट् or Present tense.

	Sing	Dual	Plural.
	एकवचनं	द्विवचनं	बहुवचनं
3rd pers	भवति	भवतः	भवन्ति
2nd pers	भवसि	भवथः	भवथ
1st pers	भवामि	भवावः	भवामः

लट् (Present.)

	प्रथमपुरुषैकवचनान्तः	प्रथमपुरुषद्विवचनान्तः	प्रथमपुरुषबहुवचनान्तः
	Singular	Dual	Plural
3rd Person.	सः भवति	तौ भवतः	ते भवन्ति
	मध्यमपुरुषैकवचनान्तः	मध्यमपुरुषद्विवचनान्तः	मध्यमपुरुषबहुवचनान्तः
2nd Person.	त्वं भवसि	युवां भवथः	यूयं भवथ
	उत्तमपुरुषैकवचनान्तः	उत्तमपुरुषद्विवचनान्तः	उत्तमपुरुषबहुवचनान्तः
1st Person.	अहं भवामि	आवां भवावः	वयं भवामः

अनद्यतनपरोक्षभूते लिट् (Perfect tense)

	ए	द्वि	बहु
प्र	बभूव	बभूवतुः	बभूवुः
म	बभूविथ	बभूवथुः	बभूव
उ	बभूव	बभूविव	बभूविम

अनद्यतनभविष्यति लुट् (Ist future.)

प्र	भविता	भवितारौ	भवितारः
म	भवितासि	भवितास्थः	भवितास्थ
उ	भवितास्मि	भवितास्वः	भवितास्मः

भविष्यति लृट् (2nd future.)

प्र	भविष्यति	भविष्यतः	भविष्यन्ति
म	भविष्यसि	भविष्यथः	भविष्यथ
उ	भविष्यामि	भविष्यावः	भविष्यामः

विध्याद्याशिषोः लोट् (imperative mood.)

	Sing	Dual	Plur
प्र	भवतु भवतात्	भवतां	भवन्तु
म	भव भवतात्	भवतम्	भवत
उ	भवानि	भवाव	भवाम

अनद्यतनभूते लङ् (Imprfect tense)

प्र	अभवत्	अभवताम्	अभवन्
म	अभवः	अभवतम्	अभवत
उ	अभवम्	अभवाव	अभवाम

विध्यादौ लिङ् (potential mood.)

प्र	भवेत्	भवेताम्	भवेयुः
म	भवेः	भवेतम्	भवेत
उ	भवेयम्	भवेव	भवेम

आशीर्लिङ् (benedictive mood.)

प्र	भूयात्	भूयास्ताम्	भूयासुः
म	भूयाः	भूयास्तम्	भूयास्त
उ	भूयासम्	भूयास्व	भूयास्म

भूते लुङ् (aorist Variety 1st)

प्र	अभूत्	अभूताम्	अभूवन्
म	अभूः	अभूतम्	अभूत
उ	अभूवम्	अभूव	अभूम

हेतुहेतुमद्भावादौ भविष्यतिलृङ् (Conditional or 3rd future)

	Sing	Dual	Plur
प्र	अभविष्यत्	अभविष्यताम्	अभविष्यन्
म	अभविष्यः	अभविष्यतम्	अभविष्यत
उ	अभविष्यम्	अभविष्याव	अभविष्याम

एध—वृद्धौ (To increase)

अयं धातुरात्मनेपदी (Atmanipada)

अकर्मकः Intr तत्र कर्तरि लट् (Present tense.)

प्र	एधते	एधेते	एधन्ते
म	एधसे	एधेथे	एधध्वे
उ	एधे	एधावहे	एधामहे

लिट् (Perfect tense)

प्र	एधाञ्चक्रे	एधाञ्चक्राते	एधाञ्चक्रिरे
म	एधाञ्चकृषे	एधाञ्चक्राथे	एधाञ्चकृढ्वे
उ	एधाञ्चक्रे	एधाञ्चकृवहे	एधाञ्चकृमहे

Or

प्र	एधाम्बभूव	एधाम्बभूवतुः	एधाम्बभूवुः
म	एधाम्बभूविथ	एधाम्बभूवथुः	एधाम्बभूव
उ	एधाम्बभूव	एधाम्बभूविव	एधाम्बभूविम
प्र	एधामास	एधामासतुः	एधामासुः
म	एधामासिथ	एधामासथुः	एधामास
उ	एधामास	एधामासिव	एधामासिम

लुट् (1st future)

प्र	एधिता	एधितारौ	एधितारः
म	एधितासे	एधितासाथे	एधिताध्वे
उ	एधिताहे	एधितास्वहे	एधितास्महे

लृट् (2nd Future.)

	Sing	Dual	Plur
प्र	एधिष्यते	एधिष्येते	एधिष्यन्ते
म	एधिष्यसे	एधिष्येथे	एधिष्यध्वे
उ	एधिष्ये	एधिष्यावहे	एधिष्यामहे

लोट् (Imperative.)

प्र	एधताम्	एधेताम्	एधन्ताम्
म	एधस्व	एधेथाम्	एधध्वम्
उ	एधै	एधावहै	एधामहै

लङ् (Imperfect)

प्र	ऐधत	ऐधेताम्	ऐधन्त
म	ऐधथाः	ऐधेथाम्	ऐधध्वम्
उ	ऐधे	ऐधावहि	ऐधामहि

विधिलिङ्(Potential)

प्र	एधेत	एधेयाताम्	एधेरन्
म	एधेथाः	एधेयाथाम्	एधेध्वम्
उ	एधेय	एधेवहि	एधेमहि

आशीर्लिङ्(Benedictive)

प्र.	एधिषीष्ट	एधिषीयास्ताम्	एधिषीरन्
म	एधिषीष्ठाः	एधिषीयास्थाम्	एधिषीध्वम्
उ	एधिषीय	एधिषीवहि	एधिषीमहि

लुङ् (Aorist Vth Variety.)

प्र	ऐधिष्ट	ऐधिषाताम्	ऐधिषत
म	ऐधिष्ठाः	ऐधिषाथाम्	ऐधिढ्वम् / ऐधिध्वम्
उ	ऐधिषि	ऐधिष्वहि	ऐधिष्महि

लृङ् (Conditional or 3rd Future)

	Sing	Dual	Plur
प्र	ऐधिष्यत	ऐधिष्येताम्	ऐधिष्यन्त
म	ऐधिष्यथाः	ऐधिष्येथाम्	ऐधिष्यध्वम्
उ	ऐधिष्ये	ऐधिष्यावहि	ऐधिष्यामहि

Other roots of the first conjugation are conjugated in this way.

विज्ञेयाश्शब्विकरणा एवमन्येऽपि धातवः ॥

2nd Conjugation.

लिख्यन्ते लुग्विकरणधातुरूपाण्यतः परम् ॥

अद्—भक्षणे (To eat.)

अयं धातुः लुग्विकरणः परस्मैपदी सकर्मकः तत्र कर्तरि

लट् (Present)

प्र	अत्ति	अत्तः	अदन्ति
म	अत्सि	अत्थः	अत्थ
उ	अद्मि	अद्वः	अद्मः

लिट् (Perfect.)

प्र	जघास	जक्षतुः	जक्षुः
म	जघसिथ	जक्षथुः	जक्ष
उ	जघास / जघस	जक्षिव	जक्षिम

पक्षे (ie or.)

प्र	आद	आदतुः	आदुः
म	आदिथ	आदथुः	आद
उ	आद	आदिव	आदिम

लुट् (Ist Future.)

	Sing	Dual	Plur
प्र	अत्ता	अत्तारौ	अत्तारः
म	अत्तासि	अत्तास्थः	अत्तास्थ
उ	अत्तास्मि	अत्तास्वः	अत्तास्मः

लृट् (2nd Future.)

प्र	अत्स्यति	अत्स्यतः	अत्स्यन्ति
म	अत्स्यसि	अत्स्यथः	अत्स्यथ
उ	अत्स्यामि	अत्स्यावः	अत्स्यामः

लोट् (Imperative.)

प्र	अत्तु / आत्तात्	अत्ताम्	अदन्तु
म	अद्धि / अत्तात्	अत्तम्	अत्त
उ	अदानि	अदाव	अदाम

लङ् (Imperfect)

प्र	आदत्	आत्ताम्	आदन्
म	आदः	आत्तम्	आत्त
उ	आदम्	आद्व	आद्म

विधिलिङ् (Potential.)

प्र	अद्यात्	अद्याताम्	अद्युः
म	अद्याः	अद्यातम्	अद्यात
उ	अद्याम्	अद्याव	अद्याम

आशीर्लिङ् (Benedictive)

	Sing	Dual	Plur
प्र	अद्यात्	अद्यास्ताम्	अद्यासुः
म	अद्याः	अद्यास्तम्	अद्यास्त
उ	अद्यासम्	अद्यास्व	अद्यास्म

लुङ् (Aorist 2nd Variety)

प्र	अघसत्	अघसतां	अघसन्
म	अघसः	अघसतं	अघसत
उ	अघसं	अघसाव	अघसाम

लृङ् (Conditional or 3rd Future)

प्र	आत्स्यत्	आत्स्यतां	आत्स्यन्
म	आत्स्यः	आत्स्यतं	आत्स्यत
उ	आत्स्यं	आत्स्याव	आत्स्याम

वस आच्छादने (to clothe)

अयं आत्मनेपदी सकर्मकः (Transitive)

तत्र लट् (Present tense)

प्र	वस्ते	वसाते	वसते
म	वस्से	वसाथे	वध्वे
उ	वसे	वस्वहे	वस्महे

लिट् (Perfect)

प्र	ववसे	ववसाते	ववसिरे
म	ववसिषे	ववसाथे	ववसिध्वे
उ	ववसे	ववासिवहे	ववासिमहे

लुट् (1st Future)

	Sing	Dual	Plur
प्र	वसिता	वसितारौ	वसितारः
म	वसितासे	वसितासाथे	वसिताध्वे
उ	वसिताहे	वसितास्वहे	वसितास्महे

लृट् (2nd Future)

प्र	वसिष्यते	वसिष्येते	वसिष्यन्ते
